# 28 - अष्टाविंश दशकम्
# लक्ष्मी स्वयंवरम् अमृत प्रादुर्भावम् च

गरलं तरलानलं पुरस्तात् जलधे रुद्विजगाल काल कूटम् ।
अमर स्तुति वादमोद निघ्नो गिरिशस् तन्निपपौ भवत् प्रियार्थम् ॥ ॥28-1॥

विमथत्सु सुरासुरेषु जाता सुरभिस् ताम् ऋषिषु न्यधास् त्रिधामन् ।
हयरत्न मभूदथेभ रत्नं द्युतरुश् चाप्सरसस् सुरेषुतानि ॥ ॥28-2॥

जगदीश भवत् परा तदानीं कमनीया कमला बभूव देवी ।
अमला मवलोक्य यां विलोल: सकलोऽपि स्पृहयाम् बभूव लोक:॥ ॥28-3॥

**लक्ष्मीं क्षीर समुद्र राज तनयां श्रीरंग धामेश्वरीम् ।
दासी भूत समस्त देव वनितां लोकैक दीपांकुराम् ॥
श्रीमन् मंद कटाक्ष लब्ध विभवद्-ब्रह्मेंद्र गंगा धराम् ।
त्वां त्रैलोक्य कुटुंबिनीं सरसिजां वंदे मुकुंद प्रियाम् **

त्वयि दत्तहृदे तदैव देव्यै त्रिदशेन्द्रो मणि-पीठिकां व्यतारीत् ।
सकलोपहृ ताभिषेचनीयै: ऋषयस् तां श्रुतिगीर्भि रभ्यषिञ्चन् ॥ ॥28-4॥

अभिषेक जलानुपाति मुग्ध त्वदपाङ्गै रव भूषिताङ्ग वल्लीम् ।
मणिकुण्डल पीतचेल हार प्रमुखैस् ताम मरा दयोऽन्व भूषन् ॥ ॥28-5॥

वरण स्रज मात्त भृङ्ग नादां दधती सा कुच कुम्भ मन्दयाना ।
पद शिञ्जित मञ्जु नूपुरा त्वां कलित व्रील विलास माससाद ॥ ॥28-6॥

गिरिश द्रुहिणादि सर्व देवान् गुण भाजोऽप्य विमुक्त दोष लेशान् ।
अवमृश्य सदैव सर्व रम्ये निहिता त्वय्यनयाऽपि दिव्यमाला ॥ ॥28-7॥

उरसा तरसा ममानि थैनां भुवनानां जननी मनन्य भावाम् ।
त्वदुरो विलसत् त्वदीक्षण श्री परिवृष्ट्या परिपुष्ट मास विश्वम् ॥ ॥28-8॥

अति मोहन विभ्रमा तदानीं मदयन्ती खलु वारुणी निरागात् ।
तमसः पदवी मदास् त्वमेनाम् अति सम्माननया महासुरेभ्यः ॥॥28-9॥

तरुणाम्बुद सुन्दरस् तदा त्वं ननु धन्वन्तरि रुत्थितोऽम्बुराशेः ।
अमृतं कलशे वहन् कराभ्याम् अखिलार्तिं हर मारुता लयेश ॥॥28-10॥

**ॐ नमो भगवते वासुदेवाय धन्वंतरये अमृत कलश हस्ताय
सर्वामय विनाशनाय त्रैलोक्य नाथाय श्री महाविष्णवे नमः ॥**

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥